International Journal of Advanced Academic Studies 2020; 2(1): 354-356




**E-ISSN:** 2706-8927
**P-ISSN:** 2706-8919
**Impact Factor:** RJIF 5.12
IJAAS 2020; 2(1): 354-356
Received: 24-11-2019
Accepted: 27-12-2019

**डॉ0 दुर्गेश झा**
ग्रामः पत्रालयश्च– वरदाहा,
भाया– अन्धराठाढ़ी, मण्डलम्–
मधुबनी, बिहारः, भारत

**Corresponding Author:**
**डॉ0 दुर्गेश झा**
ग्रामः पत्रालयश्च– वरदाहा,
भाया– अन्धराठाढ़ी, मण्डलम्–
मधुबनी, बिहारः, भारत

# विद्यावाचस्पति पण्डितोपेन्द्र झा शर्मणः व्यक्तित्वं कृतीत्व

**डॉ0 दुर्गेश झा**

**प्रस्तावना**

दरभंगा मण्डलान्तर्गत तरौनी ग्रामं स्वजन्मना गुरु कुर्वन्तौ विद्यावदावंशतया वाल्यत एव स्पुटत्प्रतिभा ज्योतिर्भराः श्री उपेन्द्रशर्माणो विश्वगुरुता गौरव भाजनेभ्यः प0 श्री मुक्तिनाथ मिश्र महामहोपाध्याय परमेश्वरशर्म परम सुप्रतिष्ठ रघुनाथशर्मभ्यः शब्दानुशासनं समधीत्य न्यायशास्त्रमपि राधाकृष्णशर्मसकाशादधिगत्य च विद्यारसिकमहाराजाधिराजरामेश्वरसिंह – महोदयैः स्वीये रमेश्वरलत्ता – संस्कृत महाविद्यालये व्याकरणाध्यापकपदे न्ययोजिषत्। अवाप्ताध्यापनवसराणां चैषां विद्याशाणधृष्टेव भृशं दिदीपे।[1]

अध्यापनकला प्रशारितसमाकर्णाकृष्टाश्च बहवश्छात्राः इदमीय पाठन विपाटिता ज्ञानकपाटास्तत्र तत्र विद्याशालासु यशस्विनोऽध्यापको गण्यन्ते। विदुषामेव परीक्ष्यतया कठिनीकृतायां दरभंगा राजकीयधौतपरीक्षायां व्याकरणे धौत प्राप्त्या सत्कृता[2] विविध निबन्ध–प्रतियोगितासु च प्राथम्युपगता इमे विपश्चित् प्रवराः।

बड़ोदरा राजकीयपरीक्षायामेषां विद्वद्वराणां समकालमेव व्याकरणे न्याये च पाण्डित्यं प्रखरं परीक्षमाणाः प्राप्त विस्मयाश्च तत्रत्याधिकारिणो बहुमान् द्रव्यदानविधया सन्तोषं प्रकटितवन्तः। इमे महानुभावः 1903 खृष्टाब्दे जन्म अलभन्त[3]। अस्य पितुर्नाम स्व0 ज्योतिर्विद बबुआ झा आसीत्।

शिक्षा क्षेत्रे–व्याकरण, साहित्य, न्यायेषु आचार्य परीक्षोत्तीर्णः, तथा च दरभंगा राजकीय धौत परीक्षोत्तीर्णः।

एते महानुभावाः म0अ0 रमेश्वरलत्ता संस्कृतामहाविद्यालये दरभंगायां व्याकरण प्राध्यापकः प्राचार्यश्चासन्[4]। अनन्तरम् 1974–79ई0 पर्यन्तं कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालयस्य व्याकरणविभागे प्रथमो विभागाध्यक्षपदमलंकुर्वाणः। पुनः तस्मिन्नैव विभागे सम्मानितप्राध्यापक रूपेण 1979–82 ई0 पर्यन्तं अध्यापनं कृतवन्तः। अस्य महानुभावस्य योग्यतमा शिष्याः सन्ति ये इदानीं विभिन्न शिक्षणसंस्थाने अध्यापने संलग्नाः सन्ति। एतेषां सामान्य रूपेण परिचयः प्रस्तूयन्ते–

योगिराजमहामहोपाध्या रामेश्वर झा (पटसा)।
पं0 महानन्द ठाकुरः (सीवीपट्टी)
पं0 रामदेव झाः (टभका)
डॉ0 उपेन्द्र झाः विमलः (टभका)
डॉ0 गोविन्द झाः (खराजपुरम्)
पं0 धनेश्वर झाः (सलहा)
डॉ0 सुरेश्वर झाश्चेति (हुलासः)।

एवं विभागे अध्यापन काले अन्येऽपि शिष्याः आसन्। अस्य महानुभावस्य मूलग्रामः वलियासए सकरी वर्तते। इमे महानुभावाः विद्यावाचस्पत्युपाधिः, तथा च राष्ट्रपति पुरस्कारेण सम्मानितः आसन 11.9.1989 सृष्टाब्दे इमे महानुभावाः दिवंगताः।

अस्य महानुभावस्य द्वौ अनुजौ–

1. पं0 सुरेन्द्र झा वैयाकरणः
2. पं0 देवेन्द्र झा।

अस्य महानुभावस्य त्रयो पुत्राः।

1. स्व0 धीरेन्द्रः (कोपरेटिभरजिष्ट्रार)
2. श्री नरेन्द्रः (अंकेक्षकः)
3. श्री महेन्द्रः (पत्रकारः)

विद्यावाचस्पतिः पं0 उपेन्द्र झा आद्यः व्याकरणविभागाध्यक्षः कामेश्वर सिंह–दरभंगा संस्कृत विश्वविद्यालयः, दरभंगा[5]।

तेषां कृतीत्वम्–इमे महानुभावाः शास्त्रीयतत्त्वाधिगमार्णव स्वरूपाः शिष्येभ्यो गूढ़ व्याकरणरहस्यानि प्रदत्तवन्तः। तेषां शिष्याः महान्तः सुपण्डिता अभूवन। शास्त्रे काव्ये– 'श्रवणसरसा शेमुषी तावकी चेद् इति भृंदूत सरण्या 'ग्रामरत्नं परीयाः' इत्यभियुक्तोक्तयो अद्यापि दूरादेवकारयति मिथिलामण्डल–मण्डनीभूता नन्दनवनीव तरूवनी। यत्र च 'नृत्यति प्रतिगृहं सरस्वतीति कस्यचिद् वं कवयितुरुक्तिमिमामक्षरशः प्रथयन्ति चिराद् 'अधीतमध्यापितमर्जितं यशः' सफलयन्तः कतिचन पण्डित परिवाराः। तत्रैव लब्धजन्मानः पुराकृत पुण्यकर्मणा 'वाणी' काणभुजौमजीगणदबाशाशीच्च वैयासिकी मन्तस्तन्त्रमरंस्त पन्नगवीगुम्फेषु चाजागरीत इति प्रमाणयन्तः पण्डिताग्रगण्याः सौजन्यधन्याः शिक्षादीक्षादिभिरन्तेवसतां संस्कारमावहन्तः सदुपध्यायाः श्रीमन्तः उपेन्द्रशर्माणः।

अस्य महानुभावस्य रचना–

1. सुभाषितावली (हिन्दी व्याख्या सहिता)
2. व्याकरण निबन्धाः
i) विश्वेदेव शब्दः
ii) प्रत्ययलोपे प्रत्ययलक्षणम्
iii) एकस्यैव फलस्य कर्तृ परगामित्वे उपग्रह व्यवस्था।
3. संग्रहीत कतिचन वेद मत्राणि सुभाषितावली विशिष्ट कृतिरूपेण विराजते।
4. समस्यापूर्त्तयः –मनीषा 1975ई0
i) प्रतीचीं दिशम्– मनीषा 3.2.1975ई0
ii) सर्वं सहाहं सहे– मनीषा–1.1.1975 ई0
iii) वारि न ददाति वारिदः मनीषा– 1.1.1974ई0
iv) सुखं शेरते– पं. उपेन्द्र झा विधावाचस्पतिः मनीषा 1976ई0

'हितोपदेश जननं काव्यं सर्वजनप्रियमिति सर्वजनीनमतनुसरता ऋषिणा कविनाः मनीषिणा च गद्यपद्य मयानि हृदयानि महत्त्वपूर्णानि सुभाषितानि विरचितानि। तानि च विशाल संस्कृवाङमये परम्परया संस्कृत विद्वत् समाजे च सुरक्षितानि सन्ति। अधुनातनानां जिज्ञासुजनां समुपकाराय तेषामेव कतिपयानां विशिष्टानां गोरवशालिनां सुभाषितानां 'सुभाषितावलीतिरूपेण संकलनं सम्पादनञ्च विद्वद्वरेण कामेश्वरसिंह–दरभंगा–संस्कृतविश्वविद्यालय सम्मान्यपण्डितेन विधावाचस्पतिना श्रीमदुपेन्द्रझा महाभागेनकृतमिति अमन्दानन्दसन्दोहं जनयतितराम्।

'सुभाषितं हारि विशत्यधोगलान्
न दुर्जनस्यार्करिपोरिवामृतम्।
तदेव धत्ते हृदयेन सज्जनो
हरिर्महारत्नमिवाति निर्मलम् ।।''

इति कविवर– वाणभट्टीयवाणीं स्मारं स्मारं विश्वसिमि यदिदं सुभाषितं महारत्नमिव सज्जनो हृदये न धरिष्यति। तैरेव बाल्यात् प्रभृति मधुपवृत्या संस्कृत साहित्योद्याने कीर्णानि कानि –चन् भावसुरभि सम्भृतानि सूक्ति प्रसूनानि विचिन्वानैः सुभाषिताबल्यामस्यां सहृदयमनोविनोदाय गुम्फितानि, तानि च तदन्तेवासिना प्रतिभाभास्वरेण सनाम्ना श्री मदुपेन्द्र झा 'विमलेन' सुधिया सरलविमल भाषया अनूद्य सर्वजन संवेद्यतां नीतानीति परमप्रीतिप्रदम्।

पण्डिताग्रगण्याः सौजन्यधन्याः शिक्षादीक्षादिभिरन्तेवसतां संस्कारमावहन्तः सदुपाध्यायः श्रीमन्तः उपेन्द्रशर्माणः।

तैरेव बाल्यात्प्रभृति मधुपावृत्या संस्कृत साहित्योधाने कीर्णानि कानिचन भावसुरभि सम्भृतानि सूक्ति प्रसूनानि विचिन्वानैः सुभाषितावल्यामस्यां सहृदयमनो विनोदाय गुम्फितानि, तानि च तदन्तेवासिना प्रतिभा भास्वरेण सनाम्ना श्रीमदुपेन्द्र 'विमलेन' सुधिया सरलविमलभाषया अनुद्य सर्वजनसंवेद्यतां नीतानीति परमप्रतिप्रदम्।

अथ सैव 'सुभाषितावली' ति प्रथिता सूक्तिमणिमञ्जूषा पञ्चशतके निर्मिताः सन्ति। सुभाषितावल्यामादौ ग्रन्थकारः प्रथमं सरस्वतीवन्दनायाः ग्रन्थारम्भः करोति तद् यथा–

तवकरकमलस्थां स्फटिकीमक्षमालां
नख किरण विमिश्रं, दडिमीवीज बुद्ध्या।
प्रतिपलमनुकर्षन् येन कीरो निषिद्धः
सभवतु मम भूत्यै वाणी ! ते मन्दहासः ।।
तरूणशकलमिन्दोर्विभ्रती शुभ्रकान्तिः
कुचभरनमिताी सन्निषन्ना सिताब्जे।
निजकरकमलोद्यल्लेखिनी पुस्तकश्रीः
सकलविभवसिसिध्यै पातु वाग्वेदतानः।।
या कुन्देन्दुतुषारहार धवला या शुभ्रवस्त्रावृता
या वीणावरदण्ड– मण्डितकरा या श्वेतपद्मासना।।
या ब्रह्माच्युत शंकरप्रभृतिभिर्देवैः सदा वन्दिता
सामां पातु सरस्वती भगवती निश्शेष जाड़यापहा।।[6]

हे सरस्वति! तव करकमलस्थां नखकिरण विमिश्रां स्फाटिकीमक्षमालां दडिमीवीजवुद्धा प्रतिपलमनुकर्षन् कीरो येन निषिद्ध, मम भूत्यै वाणि! स भवतु ते मन्दहासः।

चन्द्रखण्डं शिरसिनिधाय शुभ्रकान्तिशालिनी, स्तनभारेणनमिती सिताब्जे सन्निषण्णा। तथा च स्वहस्तकमले लेखिनी पुस्तकश्रीः, वाग्देवता सकलविभव सिद्धै नः = अस्माकं पातु रक्षतु।
याकुन्दपुष्पम्, चन्द्रः, तुषारः तथा च मुक्तामालायाः स्वच्छाः, या शुभ्रवस्त्रेणावृताः, या करावीणा दण्ड मण्डिता = शोभिता या श्वेतकमलासना।
ब्रह्माविष्णु महेशादि देवैः या सदावन्दिता, निश्शेष = सम्पूर्णजाड्यापहा सा सरस्वती भगवती मां पातु = रक्षतु।
सरस्वती वन्दनान्तरं ग्रन्थकारः पार्वतीनाथस्य स्तुतिः करोति, तद् यथा–

कण्ठे यस्य विराजते हि गरलं शीर्षे च मन्दाकिनी
वामाङ्के गिरिजनं कटि तटे शार्दूलचर्माम्बरम्।
माया यस्य रूणाद्धि विश्वमखिलं पायात्सनः शौरे।
जम्बूवज्जलविन्दुवज्जलजवज्जम्बालवज्जालवत्।।[7]

यस्य कण्ठे हि विराजते जम्मूवत् गरलम्, मस्तके च गंगा जलं विन्दुवत्। वामभागे च पार्वती जलजवत् = कमलवत्, यस्य माया सम्पूर्णम् विश्व जालवत् रूणद्धि स शंकरः नः = अस्माकम् पायात् रक्षां कुर्वन्तु।
महेश वन्दनानन्तरं तस्यात्मजः गणेशस्य वन्दना करोति ग्रन्थकारः, तद् यथा–

विघ्नं हरन्तु हेरम्ब चरणाम्बुजरेणवः।
देवेन्द्र मौलि–मन्दार–मकरन्द–कणारुणाः।।[8]

देवेन्द्र = इन्द्रमस्तके मन्दारमकरन्द कणारुणाः,गणेश चरणाम्बुजः मम विघ्नं हरन्तु। तदनन्तरं श्रीकृष्णस्य वन्दना तेन कियते तद् यथा–

संसार सागरोद्धारकरौनाम तरौ तव।
नन्दन्दन! कालिन्दौ तारणं तरिभिः क्रियत्।।
नमो जलदनीलाय शेषपयौ शायिने।
लक्ष्मीकण्ठग्रहाश्लेष निष्पन्दाय मुरद्विषे।।[9]

हे नन्दनन्दन! यदा तव नामेव संसारसागरोद्धार करी तारणी वर्तते तदा कालिन्दी तारणं कथं तरिभिः क्रियत्। नीलमेघरूपाय शेषपयौशायिने, लक्ष्मी कण्ठग्रहाश्लेषेन निष्पन्दितं मुरनाम्नाऽसुर संहारकः देवाय तस्मै नमः।
शब्दकल्पद्रुमेऽपि विश्वदेवशब्दमुपादाय विश्वे दीव्यतीति दिव अच् पुं. इति, गणेदेवताविशेष इत्यमरकोषटीकायाम्[10]।

विश्वदेवौ क्रतुदक्षौ सर्वास्विष्टिषु विश्रुतौ।
नित्यं नान्दीमुखश्राद्धे वसुसत्यौ च पैतृके।।
नवान्नालम्भने देवौ कामकालौ सदैव हि।
अपि कन्यां गते सूर्य्ये कामकालौ सदैव हि।
अपि कन्यां गते सूर्य्ये श्राद्धे च ध्वनिरोचकौ।।[11]

पुरूरवा माद्रवाश्च विश्वदेवो च पार्वणीति।। वह्निपुराणस्थगणभेदनामकाध्याये।

श्रुतं मे विश्वदेवतां यद्रहस्यं मनीषिणाम्।
तदिदं सर्वदेवानां तत्त्वतस्तत्त्ववादिनामिति[12]।।

नरसिंहपुराणस्य ब्राह्मणधर्म्मकथनपरके सप्तपञ्चाशदध्याये अष्टपञ्चाशदध्याये च क्रमशः–

'कृतस्नानस्तु कुर्वीत वैश्वदेवं दिनेदिने।
वैश्वदेवं ततः कुर्य्याद्बलिकर्म यथाविधी'ति।।
''विप्रो वा यदि वा मूर्खो द्वेष्यः पण्डित एव वा।
वैश्वदेवे तु सम्प्राप्ते सोऽतिथिः सर्गसंक्रमः'' [13]।।

एवं हि संक्षेपेन अस्यमहानुभावस्य व्यक्तित्वं कृतीत्वं च प्रस्तुतमिति।

**संदर्भः**


1. व्याकरणपाटलोद्यानम्, पृष्ठसंख्या – xii।
2. शोधप्रबन्धे (डॉ0 नवीन कुमार मिश्रः), पृष्ठ संख्या–175।
3. व्याकरणपाटलोद्यानम्, पृष्ठसंख्या – xii।
4. तत्रैव।
5. व्याकरणपाटलोद्यानम्, पृष्ठसंख्या – 1।
6. सुभाषितावली, प्रथम शतक–1–3।
7. सुभाषितावली, प्रथम शतक–4।
8. सुभाषितावली, प्रथम शतक–5।
9. सुभाषितावली, प्रथम शतक–6,7।
10. अमरकोषटीकायाम्।
11. पुराणस्थगणभेदनामकाध्याये।
12. हरिवंशे।
13. नरसिंहपुराणस्य 57 अपि च 58 अध्याये।